अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-604**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : षष्ठ)**

**चतुर्थपत्रम् – वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम्** : इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। अत्र खण्डद्वयं वर्त्तते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**(खण्डः – अ)** **25 अङ्काः**

**(वेदामृतम्)**

**(नीतिशास्त्रम्)**

**प्रश्नः1– वेदामृतग्रन्थे नीतिशास्त्रे विद्यमानेषु मन्त्रेषु स्मृताः केचन पञ्च मन्त्रा लेखनीयाः।** **(2X5=10)**

**प्रश्नः2– अधोलिखितेषु मन्त्रेषु केषाञ्चिच्चतुर्णां मन्त्राणां शब्दार्थपुरसरं स्वशब्दैरर्थो लेखनीयाः।(2.5X4=10)**

(क) यो जागारः तमृचः कामयन्ते यो जागर तमु सामानि यन्ति।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः।।

(ख) अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः।
अभयं नक्तमशयं दिवा नः सर्वा आशा मम मित्रं भवन्तु।।

(ग) अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः।
त्वं तस्यामित्रहन् वधदसिस्य दम्भय।।

(घ) यतो यतः समीहसे ततो नोऽभयं कुरु
शं नः कुरु प्रजाभ्यऽभयं नः पशुभ्यः।।

(ङ) त्वं नः सोम विश्वतो रक्षा राजन्नद्यापतः।
न रिष्येत् त्वावतः सखा।।

**प्रश्नः3– पृष्टानां मन्त्राणाम् ऋषिदेवताछन्दांसि ज्ञापनीयानि –** **(1X5=05)**

(क) उद्यानं त पुरुष नावयानं जीवातुं ते दक्षतार्ति कृणोमि।
आ हि रोहेमममृतं सुखं रथमथ जिर्व्विर्विदथमा वदासि।।

(ख) सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे संजानाना उपासते।।

(ग) विश्वानि देव सवितर्दुरितानि परासुव।
यद् भद्रं तन्न आ सुव।।

(घ) मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः।
मान्तः स्थुर्नो अरातयः।।

(ङ्) अहमिन्द्रो न परा जिग्य इद् धनं न मृत्यवेऽवतस्थे कदा चन।
सोममिन्मा सुन्वन्तो याचता न मे पूरवः सख्ये रिषाथन।।

## (खण्डः – ब)　　　　20 अङ्काः
## (अर्थसंग्रहः)

**प्रश्नः4– द्वौ प्रश्नो समाधेयौ –** (05X2=10)

(क) विनियोगविधेः सहकारिभूतानां षट् प्रमाणानां व्याख्या करणीया।

(ख) का भावना? तस्याः सविभागं व्याख्यानं कुर्वन्तु।

(ग) प्रयोगविधेर् विवेचनं करणीयम्।

**प्रश्नः5– केषुचिच् चतुर्षु विषयेषु टिप्पणी लेखनीयाः।** (2.5X4=10)

(क) प्रकृतिः । (ख) अर्थवादः । (ग) परिसंख्याविधिः । (घ) निषेधः ।

(ङ) आधिकारविधिः । (च) नामधेयः।

## (खण्डः – स)　　　　25 अङ्काः
## (छान्दोग्योपनिषद् अध्याय – 6,7)
## (इन्द्रविरोचनसंवादः)

**प्रश्नः6– छान्दोग्योपनिषत्सु विद्यमानेष्वनुच्छेदेषु स्मृताः केचन पञ्चानुच्छेदा लेखनीयाः।** (2X5=10)

**प्रश्नः7– द्वौ प्रश्नौ समाधेयौ ।** (04X2=08)

(क) नारदेन भगवान् सनत्कुमारं प्रति या या विद्या कथिताः (उक्ताः) तासां नामानि लिखन्तु।

(ख) भूम्नः स्वरूपं वर्णयन्तु।

(ग) ‘आदेशस्य यत् स्वरूपं उपनिषदि वर्णितं, तस्य व्याख्यानं कुर्वन्तु।

**प्रश्नः8– इन्द्रविरोचसंवादस्य स्वशब्दैर्व्याख्या करणीया ।** (01X7=07)

--------------x--------------